Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ सन्तानयागप्रसङ्गात् बोधायनसूत्रोक्तः प्रजार्थिहोमश्चात्र योग्यतावशाल्लिख्यते —

प्रजार्थिहोमः पूर्वपक्षे पुण्यनक्षत्रे अमावास्यायां विषुवायने वा देवालये नदीतीरेऽश्वत्थछायायां वा गोमयेन गोचर्ममात्रं चतुरश्रं स्थण्डिलं कृत्वा, ब्राह्मणानन्नेन परितोष्य, पुण्याहं स्वस्ति ऋद्धिमिति वाचयित्वा, प्राच्यां दिशि ब्रह्माणं संस्थाप्य, पार्श्वयोर्धातारं विधातारं च दक्षिणतो धातारं उत्तरतो विधातारं च (आवाह्य) ततस्तानर्चयेत् ।।

पूर्वे पुत्रब्राह्मणमावाहयामि । दक्षिणतः प्रजापतिमावाहयामि । पश्चात्परमेष्ठिनमावाहयामि । उत्तरतो हिरण्यगर्भमावाहयामि । इत्यावाह्य, तत्र पुत्रब्राह्मणप्रजापतिशब्दौ विशेषणविशेष्यौ । सावित्र्या पाद्यं ददामि । सावित्र्या निवेदयेत् । एतैरेव नामधेयैः शुक्लमन्नं ब्रह्मणे, मुद्गान्नं धातुः, पीतान्नं विधातुः । ततस्सावित्र्या अप आचम्य, प्रणवेनाष्टशतं हुत्वा ब्राह्मणमुपतिष्ठते नमो वाचे नमो वाचस्पतय' इति ।।

अथाग्निमुपतिष्ठते नमो ब्रह्मणे,

सप्तार्चिस्सप्तजिह्वः (च) सप्तधाऽग्निः प्रतिष्ठितः ।
सप्तैव विश्वाभूतानि नो ह्यग्निः प्रतितिष्ठति ।।

तत्त्वमसि ज्योतिरसि ।। इति ।।

अथ स्त्रियमाहूय सावित्र्या पलाशपर्णैः अष्टसहस्रैः तापयित्वा पुरुषसूक्तेन जुहुयात् । प्रणवेन नमस्कुर्यात् । अध्वर्युं वस्त्रकुण्डलाभ्यामलङ्करोति । ततस्सा गर्भिणी भवतीत्याह भगवान् बोधायनः ।।